Shri Raghunatha Temple MSS. Library,
JAMMU

No. ४२४४

Title शास्त्रदीपिका द्वादशाध्याय:

Author पार्थसारथि मिश्र:

Extent २३ पत्र Age सं. १२६४

Subject मीमांसा

© Dharmartha Trust J&K. Digitized by eGangotri

पूजास्तुदीपिकाद्वादशाध्यायः

५२५५

5255
F 32

© Dharmartha Trust J&K. Digitized by eGangotri

१२

शास्त्रदीपिकायां द्वादशोऽध्यायः पत्रे २३

© Dharmartha Trust J&K. Digitized by eGangotri

१ ॥श्रीगणेशाय नमः॥ तंत्रिसमवाये चोदनातः समानानामेकतंत्रमतुल्येषु तु भेदः स्याद् द्विविधक्रमताद्दर्शनाद्
दर्शनाच्छ्रुतिकालनिर्देशात् ।सकृदनुष्ठितमप्यंगं बहूनां प्रधानानामेकदेशकालकर्तृकाणां शक्नोत्युपकर्तुमिसेत्ततं
त्रत्वमस्य रणेकस्मु पजीव्यकिमन्य प्रमाणवि शेषत्वादेवैवं भवत्सुतास्मा इद्र मनुष्ठानं तास्मा इसे वं गृह्य मात्तोर्थ विवि प्र
षेऽस्मा र्थेऽप्यनुष्ठितमंगमन्यस्यापि देशाद्भेदे शक्नोत्युपकर्तुं न तादर्थ्ये न पुनरनुष्ठातव्यमिति विंसने इति तंत्रप्रसं
गयोर्हेतुर्हेतुमत्ता ॥ अग्नीषोमीये पशावैष्टिको विधंतः प्रवर्तते। तत्र पशुपुरोडाशोऽग्नीषोमीयस्य वपया प्रचर्याग्नीषोमी
यं पशुपुरोडाशं निर्वपतीति। ।अत्राप्यैष्टिको विधंतः। तत्र विसते किंपशवर्थानुष्ठितान्यंगान्यानि पुरोडाशस्य नोपकुर्वंतितेन
न तद् र्थेप्यपगनुष्ठातव्यानि ।उत तैरेवोपकारासिद्धेर्न पृथक् पुरोडाशार्थेनांगानामनुष्ठानमिति। तत्र। अंगानि प
शुकालानि पश्वर्थानीत्यसंशयं ।अनागते पुरोडाशकालेन हि तदर्थता। अस्या र्थमनुष्ठितं ह्यंगं नान्यस्योपकारकं। राम
तदर्थेन कृतं तस्य न तथा प्रकृतिर्दर्शनात्। प्रकृतौ हि पशुदेशेनांगमनुष्ठितं तं स्यैवोपकारकं दृष्टमिती हापि नाद्रमा १

© Dharmartha Trust J&K. Digitized by eGangotri

र्ममनुष्ठितमग्नष्टोमं करोति । किंच विधीयमानं कालादौ कर्म सांगं विधीयते । स काले ऽन्तःपुरोडाशः कार्यः स
र्वांगसंगतः । वपाप्रचारकाले हि उपदिष्टत्वात् दृष्टः सर्वांगयुक्ते पुरो । डाशे कर्तव्यतया विज्ञायमाने कोऽन्यामश्या
स्यातिक्रमेण प्रधानमात्रमनुष्ठातुं क्षमः । वैगुण्यं च प्रसंग समाप्रमणे स्यात् । अथयाजानंतर्य्येणास्य भागांग
गं । तदानंतर्यं च प्रधानांगं प्रकृतिवद्तिदेशात् । न द्विह पाशुके प्रयाजे प्रसभ्यमाने पुत तदानंतर्य गुणहाना
दिगुणा प्राज्यभागेन स्वकार्यं साधयेयतां । अथ वैकल्पिकत्वात् सर्वशावे वाज्यभागाव नुष्ठितौ न तत्स्तयोरपि प्रस
समानयोः पुरोडाशस्य तदानंतर्यगुणलोपात्स्वकार्यसाधनत्वं स्यात् । तस्मान्न पाशुकानामंगानां पुरोडाशे प्रसं
गइति तस्य सांगानि ह्यथ कर्तव्यामेषा गुणकालकृतं चापि वैगुण्यं भाष्य इदरितं । इतोऽपिनप्रसंगोस्तीसे वं प्रा
प्तेऽभिधीयते । वितते पाशुके तन्त्रे समाप्तिमगतेसति । मध्ये पतन्न पुरोडाशस्तंत्रमुपजीवति ॥ १ ॥ येन केन
पुरोडाशेयोविध्यंतः समर्पितः । एष कः स्व पशौ वे वर्पित तोहश्यतेयदा । नदा तेनैव संतुष्टः पुरोडाशविधि

© Dharmartha Trust J&K. Digitized by eGangotri

सयंभा कृतानां पराभर्गानां न करोत्युपसंग्रहं । पुरोडाशप्रयोगवचनो हि प्रभुत्वं भवितते तद्दीमेषु अभ्यौआतुमा
२ नापंगेषु कृतकरिष्यमाणोपुतत्कौर्पषुवोपकारेषु आरब्धरीक्षितरूपे एमनाशिविपरिवर्तमाने षुतन्म
ष्पपुरोडाशभावनांवोद्दक समर्पितमपाजाधंगजन्मोपकारापुत्कांशिद्भद्राधवातत्पश्ववैरेखोपकाा
रैसद्दगामुष्पीअफासंगानिपशुतोनलभ्यंतेतद्युकामेवविद्भागतामोद्दशिषंचप्रधानंविधीयततेषामे
वप्रधानकासंक्रमश्चांगंभवैतिः नेनप्रधानमात्रानुष्ठानेऽपिवास्तिशास्त्रातिक्रमः नद्याविधीममानामंगा
तिभवंति । नापिकमलोपाद्देगुण्यंमादिकार्यसमपाजादिन्मसकृतसातन्मात्रस्यपुरोडाशभावनमोपजी
वनाद्धाघराणपरिहर्तं । नवेवंषौर्णमासमर्थकृतांगकृतानामुपकाराणामाकशपूर्वनिष्पन्ने रवुस्मानाद्दः
मावास्यामामायांनभूयः प्रजादीनिकर्तव्यानिस्युः । तत्रत्रयोदशअमावास्यामामितिवषद्भूराद्भुतीनामाहवनीय राम
गतानांसंस्पादर्शनंनोपपद्यते । नमहिदंवारुराप्रध्यासिकयोर्दासिएतेतरविहारपोर्भिधःप्रसंगानिराक २

रणेन निराकृतं बोध्य । पौर्णमासां पौर्णमासा यजेत अमावास्याममावास्यया यजेते इति द्वितीये दृष्ट्वा केपरस्परमनपेक्ष
माणौ द्वयोः कालयोस्तिक एककस्याङ्गमुक्तं स प्रयोगद्वयं विदधाते इति कः प्रसंगः प्रसंगस्य । प्रसंगे हि प
थावोदितानुष्ठानात्क्रमादन्तो मे न वैगुण्यमामावास्याख्यकार्यसाधनाय पर्याप्नुयात् । इह तु ल्पस्य तन्त्रविहिते
प्रवृत्तानप्रवृत्ते च पुरोडाशे विधीयमानः प्रसंगमुपजीवतीति वैषम्यं । पशुप्रकृतावनमोद्देशेनानुष्ठितामंगानामु
पकारकाणि दृष्टानि इहापि पुरोडाशे तथैव कर्तव्यानीत्युक्तं । तदयुक्तं । न हि प्रकृतावुद्देशोऽङ्गं अविहितत्वात् प्रयाजा
दिस्वरूपमात्रं तंगं आर्थिकस्तु तन्नोद्देशः ननु आर्थिकं पशोरेकः प्रति दिशति तस्मादस्ति प्रसंगः । अन्यथापि तु विनांगस्या
मेनोपजीवनं प्रसंगः जैमिनेः परतन्त्रापत्तेः सतन्त्रप्रतिषेधः स्यात् । स्थितं पाशुकै रंगैः कार्यसिद्धेः न पुरोडाशस्य पृ
थगंगानि कर्तव्यानीति । प्रसुनराज्यभावप्राता दिकमंगं पशौ न विघ्नते तदपि पुरोडाशेन कर्तव्यं कर्तव्यं वेति संशयः ।
तदर्थमिदं विचार्यते । प्रसंगमुपजीवता पुरोडाशेन प्रयोगवचनमवाप्तिं वा चोदको बाध्यते उत चोदकस्य बाधः प्रयोग
वचनस्य बाध्यत इति । तत्र प्रयोगवचनः प्रससत्वान्न बाध्यते चोदकस्य सत्त्वानुमेयता दुर्बलत्वाग्र प्रमहति । लिङ्गप्रसवा हि प्र

© Dharmartha Trust J&K. Digitized by eGangotri

योगवचनः प्रत्यक्षेण स्वशक्त्यतेवाधितुं प्रकृतिवच्च इत्यत्र आनुमानिकोऽयं बाध्यते। तेन पाशुकेन चोदकेन प्रा
३ 3 पितामंगकार्माणां पौरोडाशिकः प्रयोगवचनः संगृह्यते तद्विशिष्टप्रयोगं विधत्ते तैरेव च पुरोडाशस्य निराकां
क्षत्वात् तच्चोदकेन लुप्यते तेन पशौ विद्यमानानामेव पुरोडाशेन संग्रहात् अभ्यागादेरकरणमिति प्राप्ते ब्रूमः
चोदकेनांगकार्माणां पुरोडाशान्वये सति। प्रयोगवचनः पश्चात्तद्विशिष्टं विधास्यति। यत् खलु भावनासंबंधितपा
शुसादिभिरनिर्दिष्टेन वा समर्पितं तद्विशिष्टां भावनां प्रयोगवचनो विदधाति न तु स्वयमंगानि भावनान्वया संबन्धा
ति विधिमात्रव्यापारात्। न च पाशुकेन चोदकेन पुरोडाशान्वयोऽङ्गानां कार्माणां क्रियते। तेनावश्यं पौरोडाशिक
श्चोदकोऽङ्गीकर्तव्यः। तेन तु प्राकृतेष्वंगेषु कार्यमुखेन भावनान्वयितया समर्पितेषु तद्विशिष्टां भावनां विदधत् प्रयो
गवचनोऽपाणिपश्वर्थतयैव प्रत्यक्षान्तानुष्ठानानि नैव तु यथा विध्यैरनतद्द्रतासु प्रजीवांगान्तरप्रयुक्तां विदधाति। तेन प्रयोग
वचनैकदेशोऽपः प्रयाजादिविषयः संबाध्यते। अंगान्तरेषु ह्यमोऽपि न बाध्यते इति सिद्धमभ्यागादेरनुष्ठानं। किञ्चि
तु प्रयाजादिष्वपि प्रयोजकत्वविधेर्न बाध्यते स सैव तु प्रयोजते कार्यसामान्यैरेव सिद्धेर्न्यानुष्ठानं। एवं चाप्रयोजकादिशेषो भव
ति। इतरथा प्रसंगप्रयोजकयोरविशेषः स्यात् पिरिस्याद्। न चेदं समस्तारं प्रदिशस्त्येण पुरोडाशार्थेन पावमायपाप्रवा राम
पाप्रचारादूर्ध्वकाले प्रयाजादीनि कर्तव्यानीति गोध्यते कस्तदा तदिति क्रमेणामार्थाय्यगामुपजीव्य तुं समः। परस्पृष्यते। प्रयो ३

© Dharmartha Trust J&K. Digitized by eGangotri

जनमप्यनुष्ठाने हेतुः । नचेह पृथगनुष्ठाने प्रयोजनमस्ति अभावे ऽर्थैरेवकार्यासिद्धेरिति । तदपि पाकं भित्तू । यदि शास्त्रा
सु पुरोडाशार्थतया ऽवगतं पृथगनुष्ठानं तदा तद्वैफल्यं कल्प्यते । पृथगनुष्ठितैरेव पुरोडाशस्योपकारः सिध्य
तीति न पृथक्त्वमर्थैरिति । न तु प्रयोजककल्लोपे ऽसत्यप्रयोजकाद्विशेषापत्त्या इति तदपि तुच्छं भाष्यं । अप्रयोजकेष्वपु
क्तिसामर्थ्यमेव नास्ति प्रसंगात्तु प्रयुक्तिसमर्थ एव तत्र सार्थ्यं नानुपजीवनं लाघवात् करोतीति विशेषः । यद्यपि सत्यपि
प्रयोजकत्वे कार्याभावादननुष्ठानं । ततो ऽपकृतास्वधासेषु तत्र वौ हार्यीकैरेवांगैरर्थसिद्धेः कार्यसिद्धेः सत्यपि देशभेदेक
त्वेने देवविकाराद्यनभेदः स्यादर्थस्यापिकृतत्वादिसनेतन्यायेन पृथगंगानि न क्रियेरन् । किं च पाप्रकारानंतरका
ले पुरोडाशो ऽपयदि सकलप्राकृतांगयुक्त एव कर्तव्यस्तदा नो घटते तत्र तस्मिन्नेव काले सर्वांगयुक्ताकृतेन क्रमेणा
कार्यतया ऽवगम्यमानेषु मपप्रिकर्षपित्तप्राकृतानां प्रयोजाद्यंगानां कार्माणि निष्पन्नान्यनपेक्षितानि सान्निहिता
नीति कृत्वा तानि न क्रियेरन् । तथापि यानि तस्यामेव वेलायां पृथक्त्वेनाप्यननुष्ठितान्यनपाजांहीनि तानि क्रमवशा
न्नपरोडाशिकेऽपि दानानंतरमनुष्ठितानि कर्तव्यत्वात् पुरोडाशप्रयोगवचनात् सांध्यमानानि किमिति न क्रि
यंते । न हि तदननुष्ठाने निष्प्रयोजनं तत्कार्यसिद्धावप्यनि प्यत्वात् । अनुस्तत्र स्वत्वमती सल्लोकारणाभावात् । अस्मत्
पक्षे पुनः पृथक्प्रयोगवचनसान्निध्यापितामग्नानुपजीवन् पुरोडाशविधिर्यदि शागानि तेन पूर्वापरकालवर्तीनि सन्निधापि

© Dharmartha Trust J&K. Digitized by eGangotri

गानितादृशामेवलाघवतृष्णायाप्रज्ञी यांधिकानामेवमुंभांगं। धि धलइतिपुक्तं भादिनामपिप्रसंगोपज्ञी यनेनान
४ नुष्ठानं। लाघवमेवाहि प्रसंगेकारणं। आह न। अप्रार्थ्याऽनुष्ठितेः शेषैकृप्रकारेऽप्यकल्पना। प्रसंगेन दृष्टार्थवचसा
दृपिष्टप्रकल्पना। तस्मात्प्रयोगवचनैकदेशोलभ्यतएव। अधिकांगविषयस्तु शेन लभ्यतइतिसिद्धमाम्नायाद्वनु
ष्ठानं।२। नानार्थत्वात्सोमे दर्शपूर्णमासप्रकृतीनां वैदिकमसमान। ज्योतिष्टोमयानि प्राकृतानि दर्शपूर्णमा
सप्रकृतीनि कर्माणि प्रवर्तन्ते। तेषु प्राकृतैर्वैदिकैराकृतीवेदिः कर्तव्या इति संदेहे यथायथं प्रधानार्थ प्राकृतवेदि
स्तथापि प्रधानार्थस्यानन्तहविरासादनार्थो यः आकृतसाः कार्यसाधपती इति दर्शयाकृतीकर्तव्या। नेवं। प्रधानार्था
पिप्रसंगाद्धविरासादनमपिशक्नोति साधयितुं। नाहि तस्यां क्रियमाणं हविरासादनं विगुणं भवति। वैधाहि हविरासा
दनं प्रकृतौ श्रुतं तत्साधर्म्यमेवेति। तस्मान्नप्रधानार्थं वप्रसंगादासादनेनोपनीयते। पात्रेषु च प्रसंगः स्याद्धोमार्थ
त्वात्।। सोमंगे ज्योतिष्टोमे धुकर्मस्तु किं सोमार्थमेवपात्राणि प्रसत्तैतेउतजुह्वादीनि पात्राणि दृश्यकर्मयोक्तव्यानी
ति संदेहे सोमिकैरेव होमार्थैरेष्टिकानामपि होमादिकार्यसिद्धेः प्रसंगो मन्यते। जुह्वादिनिर्माणिहोमादीनि अन्ये
:क्रियमाणानि विगुणानि भवेयुः। न वा आमैरेव होमाद्युपकृताः येन दृष्टोपकाराभावाज्जुवत्तपुनः क्रियेरन्। तेन कर्त्तमा
संतोहोमाद्यः स्युः कुतः संभवेत् किमिति विगुणाः क्रियन्ते तस्मान्न पात्रसंगः। उत्तमिति पशुपुरोडाशेन स्यादितरस्य प्र राम
युक्तत्वात्।४। अग्नीषोमीयपशौ ... पशुपुरोडाश इति स्थितं अतः सोपि तत्रैव प्रयोग ४

© Dharmartha Trust J&K. Digitized by eGangotri

केव आग्रयणिन अहनिं मन्यनेन पशु आग्रयणेन पुरोडाशः अपितो भवति तेन पृथक् १
अपचितव्यः पुरोडाशश्चोदकप्राप्तेगार्हपत्ये आग्रयणिनश्चोवेगुणत्वात्। आग्रयणं चाग्निहोत्रस्य शालामुखीयेन समासाजहितस्य
विद्यमानत्वात्। कौण्डपायिनामयनेऽग्निहोत्रे किं प्राजहिते मुख्ये गार्हपत्ये श्रपणं उत शालामुखीये इति संशये चोदकप्राप्ते
शालामुखीये स्यात्। ज्योतिष्टोमे हि शालामुखीय एवानउद्धृत्य गार्हपत्यो भवतीति शालामुखीयो गार्हपत्यकार्यविहितश्चोदक
परंपरया कौण्डपायिनामयनं प्राप्तस्तस्मात्तत्र श्रपणं स्यात्संचोदकादेवं। अग्निहोत्रनामधेयात्तु नैयमिकाग्निहोत्रवन्मुख्य एव
गार्हपत्ये श्रपणं प्रापितं। न ह्वचोदकाद्दलीयस्त्वमुक्तं केचित्तुद्धत्वा चिंतामाहुः। असत्यपि नामधेये गार्हपत्ये हवींषि श्रप्य
ती संस्थानारम्भवाहस्य सर्वार्थत्वादुपदेशतः प्राप्तः प्राजहितः चोदकप्राप्तं शालामुखीयं बाधते इति तन्नैवं। अनारभ्यवा
दस्य हविः श्रपणाद्धारकत्वात्कौण्डपायिनामयने च हविःश्रपणस्याश्रुतत्वात्प्रकृतितः प्राप्यमाणस्य सहैव प्राजहिते
न प्राप्तो हि रूकत्वान्नोपदेशसंभवः। तस्मान्नाम्नैव प्राजहितप्राप्तिः। ननु सिद्धं नाम्नां प्रावल्यं सप्तमे। स संदर्दं तु पुनः संगतिरा
करणार्थं सूत्रं शालामुखीयस्तावदस्मिंस्तंत्रे चोदकेन सर्वगार्हपत्यकार्यापयुक्तः स एव पुनः संगादग्निहोत्रश्रपणमपि साधयिष्य

© Dharmartha Trust J&K. Digitized by eGangotri

तिविनापिनारर्थ्ये नेतिशंकासेयं निराक्रियते। अन्यार्थस्य नाम प्राप्तेन प्राजहितेन नबाधितत्वादिति पूर्ववत् साद्गुण्यसंभ
५ वे वैगुण्यानाश्रयणादि सस्येवन्यायस्यप्रपंचः। हविर्द्धाने निर्वपणार्थसाधयेनांप्रयुक्तत्वात्। ज्योतिष्टोमे हविर्द्धान समाख्य
याः सोमधारार्थयोरनसोः प्रवर्त्तनेकृते यानि सवनीययुरीडाशादीनि तेषां किंनयोरन्यतरत्र निर्वपणं उतानोनमरमुपादेय
मितिसंदेहे। अनसोधिनिर्वपतीसस्यप्रकृतिनः प्राप्तस्यसोमसाधारणार्थाभ्यामविप्रसंगः सिद्धेः ननिर्वापार्थनांनरमुपा
5 देयांससमेतावत्संभवति देशस्तु निर्वापस्याश्रयरेणागार्हयत्संनिर्वपतीति प्रकृतितः प्राप्तौ हविर्द्धानयोर्नसंपद्यते। नयोर्म
त्रवर्निययमवमहावद्यामवस्थायितयोः प्राग्वंशानयनासंभवात् तस्मादनोत्तरमुपादेयमवैगुण्यात्। न धुक्रंचकाल
मेहात्। रीक्षाकालं जागरणमाम्नातं दीक्षोत्तरकाले सुप्रायणीयादिकर्मसु किं चोदकप्राप्तं दर्शपौर्णमासिकं जागरणं क
र्तव्यं नेति संशये सामार्थेन दीक्षाकाले न जागरणेनप्रसंगात्कार्यसिद्धेर्नाश्यत्क्तेषु जागरणं कर्त्तव्यं। यदिनावरप्रमादा
र्थं जागरणं यैः साधनरक्षार्थं। ननोनदीक्षाकालेषुरक्षितेषु नद्रुनरकालानिरक्षितानि भवंतीनि नवर्थं पुनर्जागरितव्यं। अ ५

© Dharmartha Trust J&K. Digitized by eGangotri

याहृष्टार्थं जागरणं। तथापि सौमिके न जागरणेन वैदिकजागरणजन्यादृष्टसिद्धेः प्रमाणाभावात्तदर्थं कर्त्तव्यमेव प्राक्तनं
जागरणं। मंत्राम्नसन्निपातित्वात्। वरुणप्रघासेषु दक्षिणोत्तरविहारयोर्निर्वापादिमंत्राः किं तंत्रेणाध्वर्युणा प्रतिप्रस्थात्रा वा
अन्यतरेणैव कर्त्तव्याः उतो भाभ्यामिति भेदेनेति संशये। अन्यतरेणाप्युच्यमानाः शक्नुवंत्युभयोः स्मृतिं कर्त्तुमिति मन्यते।
निर्वपामीत्यादेरास्ताभिवादिवाक्यानं तंत्रता संभवतीत्युभयोः पृथक्प्रयोगः। सकृदसकृदनुष्ठानप्रसंगात्तंत्रत्वापत्तिं नापीय
मत्रकृता। धारणार्थत्वात् सोमेग्न्युत्साधनं न विद्यते। सोमांगेष्वैष्टिकेषु कर्म्यस्तु चोदकप्राप्तमस्त्यन्वाधानं कार्यं नेति संदेहे चो
दकानुग्रहात्कर्त्तव्यमिति प्राप्ते ब्रूमः। धारणार्थं तु तत्र। सोमार्थं च विहृतस्याधारितस्य चाग्नेस्तेनैव धारणेन प्रसंगसिद्ध
कार्यत्वात् न पुनर्द्धारणं कर्त्तव्यं। ननु चाक्रतु समाप्तेः पुनः पुनः प्रयत्नेन धारयितव्य एवाग्निः। सत्यं तत्पापिनाग्न्यन्वाधानं का
र्यं न हि विहृतस्य चाग्नेराधेयः समिंधनव्यापारो धारणार्थस्तदृयं। न हि तस्य कृतो पुनः पुनः कृतं। तस्मादत्रापि धार्यमा
णस्य धारणायाग्न्यन्वाधानं न कर्त्तव्यं। न यावन्मुपेतत्वात्। तत्रैव प्राकृतं ब्रह्मत्वनापायनं कर्त्तव्यं नेति विचारे कर्त्तव्यमिति प्रा

© Dharmartha Trust J&K. Digitized by eGangotri

नेसोमार्थोपेते नैवव्रतेन न सत्सवदनब्रह्मचर्यादिसंकल्परूपेणासमासेरविस्टेन प्रसंगात्सिद्धेर्न पुनरुपायतं कर्त्तव्यं
६ ॥१०॥ ग्रहणार्थं च पूर्वमिष्टेस्तदर्थत्वान्न्यायेयुक्तं धारणार्थत्वात्सोमेऽग्न्यन्तरस्य न्याधानं न विद्यते इति न द्राक्षिप्यते। यदि नत्वेव
6 त्वं धारणार्थं स्यात्तन्नोनविद्येत। न तु दर्शपौर्णमासयोर्देवतापरिग्रहार्थमपि श्रूयते। न मामग्ने वर्च इति पूर्वमग्निं गृह्णाति
देवताए नूनं पूर्वैर्युर्गृहीता श्चोभेते यजन इतितनः प्राणीयादिष्वपि तत्तद्देवतापरिग्रहार्थं कर्त्तव्यमग्न्याधानं नैवं। नत्व
ग्निधारणे दृष्टे देवतापरिग्रहार्थत्वमर्थवादमात्रो ययुक्ता हाक्यशेषान्नूकल्पयितुं शक्यं। अस्तु पेयस्त्वन्नमः। यद्यपि देवतापरि
ग्रहार्थं न थापि प्रापणीयादिषु अकर्त्तव्यं। दीक्षणीयाया अपि हि वाक्यशेषे देवतापरिग्रहार्थता श्रूयते। अग्नावैष्णवमेका
दशकपालं निर्वपेद्दीक्षिष्यमाणोऽग्निरवमो देवतानां विष्णुः परमो देवता एव तदुभयतः परिगृह्य दीक्षत इति यद्यपि दीक्षा
सोमस्येति वचनात्सधानार्था दीक्षणीया प्रधानदेवता एव परिगृह्णाति तथापि वैश्वदेव ग्रहे सर्वदेवता समवायात्तत्परिग
हं कुर्वनी दीक्षणीयाप्रसंगादंगकर्मदेवता अपि गृह्णाति न हि विश्वेदेवशब्दः कस्यचिद्देवतागणस्य वाचकः प्रसिद्धपदार्थस ६

© Dharmartha Trust J&K. Digitized by eGangotri

समुद्रायस्य श्रुत्यंतरकल्पनायां प्रमाणाभावात्। तस्मात्सर्वदैव यजनत्वात्तस्य परिग्रहे च सर्वान्तर्गतानामंगदेवतानामपि प्रसं
गतः परिग्रहादकर्त्तव्यमन्वाधानं यद्यप्युपगमपक्षे दीक्षणीयायां कर्त्तव्यमेतान्वाधानं। ततः परं तु न कर्त्तव्यं॥ १२॥ सन्नहनं
यजनत्वात्। दार्शपौर्णमासिकं पत्नीसन्नहनं प्रायणीयादिषु प्रायणीयादिषु चोदकप्राप्तं कर्त्तव्यं। नैवं। वासोधारणार्थत
त्वाद्दीक्षाकाले तेन सोमार्थेन सन्नहनेन वाससो धारितत्वादकर्त्तव्यं। अथापि न वासोधारणार्थं तथापि सन्नद्ध्येयं कर्मणि का
र्याणि स्येवमर्थं सन्नहनं नादृष्टार्थं। अन्यार्थेनापि सन्नहनेन सन्नद्धैवेति न पृथक्सन्नहनं॥ १३॥ अन्यविधानाद्वारणभो
जनं तस्य उभयं हि दृष्टार्थं। आरण्याशनमपि प्रायणीयादिषु चोदकप्राप्तमपि दृष्टार्थत्वात्सौमिकेनैव पयोव्रतादिना कृति
सिद्धेरकर्त्तव्यं॥ १४॥ शेषभक्षास्तथेति चेद्दृष्टार्थत्वात्। एवं तर्हि शेषभक्षा अपि यजमानकर्त्तृकाइडाभक्षणादयस्तेपि
दृष्टार्थत्वात्सौमिकव्रतेनैव निवर्त्तेरन्। सत्यं यदि दृष्टार्थास्ते तु शेषप्रतिपत्त्यर्था यजमानपंचमाइडां भक्षयंतीति शेषस्य
द्वितीयानिर्देशात्। नहि दृष्टं षष्ठ एव साधितं तस्य तिरःप्रयोजनकथनं प्रसंगात्मकत्वादिहोक्तं॥ १५॥ यजनत्वात्परिक्रयः॥

© Dharmartha Trust J&K. Digitized by eGangotri

दीक्षणीयादिषु चोदकप्राप्तान्वाहार्यदक्षिणादानव्यानेति संशये दक्षिणाः सोमस्येति वचनाद्द्वादशशतदक्षिणा केव
८ लप्रधानार्थेत्युक्तं। अतोंगेषु स्वार्थदक्षिणादानमेव। प्रसंगसिद्धः कार्यत्वात्तु न दानव्या। प्रधानार्थत्वाननतिरूपकमप्र
वृत्तस्य समाप्तेः यद्वन्वाचानयद्वक्ता चाव स्थितेनामेवाप जीवनोदीक्षणीयादि विधयश्चोदकप्राप्तामपि स्वार्था मानतिनप्र
युंजते। किंच यथाद्दक्षिणायां मसामानतिमेदाद्दंगप्रधानानामभक्षनतः कर्तृभेदस्यापद्येत। किंच। यैः प्रधानं कर्तव्यं तै
रेवावश्यमंगान्यपि कर्तव्यानि नाकुर्वद्भिरंगानि प्रधानं कर्तुं शक्यमिति निश्चितेन शास्त्वार्थप्रधानार्थत्वे नागानांवत्वा
दंगान्यपि कर्तव्यानि भवंतीति प्रसंगसिद्धानुष्ठानत्वान्नागे दक्षिणा॥१६॥ शेषभक्षास्तियेतिवेन्न। पूर्वयजमानभक्ष
स्य वृत्तसमर्थत्वाद्भूतेन निवृत्तिराशंक्षितासंप्रतियक्ष्यर्थाभक्षानानसमर्थोदन्नि। दशमएव चानसमर्थत्वं भक्षाणां निराकृतं
तस्येदं प्रयोजनं प्रसंगात्मकत्वादिहोक्तं॥१७॥ अग्न्यन्वरणत्वात्प्रतितंत्रं वरणं होतुः क्रियते। दर्शपूर्णमासयोर्होत्व
रणमाम्नातं अग्निर्दैवोदैव्या होतेति न क्तिमानसमर्थत्वात्तामिष्टेनैव वरणेनाग्निर्होता समेहोते सादिनाप्रसंगाद्दान ८

© Dharmartha Trust J&K. Digitized by eGangotri

निसिद्धेष्टीष्टणीयादिषु न कर्त्तव्यमुतादृष्टार्थत्वात्कर्त्तव्यमिति संशये वरणस्यानर्थत्वान्निवृत्तिं मन्यते। ननु प्रवृत्तेक
र्मणि क्रियमाणमनुयाज्यावरणवददृष्टार्थं। नैवं। अनुयाज्यावरणमारादेवेवा न सर्थे कृते वरणे पश्चात्क्रियमाणमदृ
ष्टार्थं स्यात्। होतुस्तु प्रागस्तिवरणं। अतः प्रवृत्तेपि कर्मणि दृष्टार्थमेवा ब्रह्मवरणवत्। इष्टेष्टिहि पूर्वेद्युरेवामावास्यायां
वेदिकरणेनुमन्त्रितानेप्रवृत्ते ब्रह्मणि अपरेद्युः पूर्णिमा प्रणयनकाले क्रियते। अथ च दृष्टार्थमेवान्यथा न दृष्टिदीक्ष
णीयादिषु कर्त्तव्यं स्यात्। तस्माद्धातुर्वरणमपि न कर्त्तव्यमिति प्राप्ते ब्रूमः। प्रवृत्तस्य वरणं न कथंचिद्दृष्टार्थं भवति। दक्षिणा
दानं हि भविष्यद्रव्यस्यमपि भवसान ति निमित्तं लोके तथा दर्शनात्। न तु वरणे न भविना भवसानमनं। तस्माददृष्टार्थं। ब्र
ह्मवरणं तु वृत्ते ब्रह्मणि क्रियते। पौर्णमास्यां तावदप्रवृत्त एव ब्रियत इत्यविवादं। अमावास्यायामपि पूर्वेद्युरपकृष्यमा
णा वेदिः सांगमन्तमप्रसवमित्युक्ते ब्रह्मणो वरणमप्यपकर्षति। विंगाद्धि वरणस्यानतिरेव प्रयोजनं गम्यते। प्रयोजनव
शेन च पाठक्रमं वाधित्वा युक्तमेव वरणस्य पूर्वेद्युरनुष्ठानं। तस्माद्प्रवृत्तविषयत्वाद्ब्रह्मवरणं दृष्टार्थं। न चैवं होतृवरण

© Dharmartha Trust J&K. Digitized by eGangotri

स्यापकर्षः संभवति स्वद्रुतेः सामिधेनीरन्वाहेति वचनात्। तस्मादृशार्थ्यं होत्रवरणं प्रतिकर्मकर्तव्यं ॥१८॥ यद्वा सेषु प्र-
८ देशेष्विष्टिनकर्मप्रयोगनेदास्य निर्मन्त्रं क्रियते। पशाविति थ्यायां बर्हिस्तृणमुपसदां नरग्नीषोमीयस्येति बर्हिः साधारणमिति सिद्धु-
१४ कमेव। त्रयाणामर्थे नोपात्ते वर्हिषि संस्काराः प्रोक्षणादयश्चिंसंनेकिंनेप्रतिकर्मीवर्तनीघाउतातिथ्याकालकृता एवोपस-
त्स्वग्नीषोमीये च प्रसज्यन्त इति संदेहे मध्यपाताभावान्न प्रसंगो नापि तन्त्रमातिथ्याकालत्वेनविशेषुग्रहणादिति प्राप्ते ब्रूमः
। सत्संनंतंत्रनाप्रसंगस्तु भवति। तन्त्रमध्यपाताभावेपि बर्हिर्धारायेसंस्कारास्ते यदर्थं बर्हिरूपात्तं न दर्थाविज्ञायमाना बर्हि-
षः साधारणत्वात्तेपि सकृदेव कर्तव्याः स्वगते सतिनीं नरीयकमातिथ्याकालेनुष्ठानं उपसदादेस्तदानीमप्राप्तत्वात्।
न चैतावदातिथ्यापवर्गपद्रुअंतेबर्हिषानपहृतकृत्वात्। तदर्थत्वाच्चतेषांनस्मान्नभेदेनकर्तव्याः ॥१९॥ देशपृथक्त्वा-
न्मंत्रोप्यावर्त्येते ॥ तदेव बर्हिर्यदातिथ्यार्थंप्राग्वंशस्तीर्णं तन्न आनीपायरेणान्तरवेदिमग्नीषोमीयार्थेनस्तीर्यते। तत्र दा-
किमूर्णामुदसं त्वा स्तृणामीति स्तरणमंत्रः पूर्ववत्कृत एव पुनस्त्यजते उतावर्तनीय इति विचारे पूर्ववद्बर्हिः साधारणास्य संग। ८

© Dharmartha Trust J&K. Digitized by eGangotri

सादुच्यैते। स्यादेवं यदि बर्हिरर्थं स्तरणं स्यात्तत्तु बर्हिषो वेदीं स्तृणातीति द्वितीयानिर्देशात्प्रयोजनवत्त्वाच्च वेदिदेशसंस्का
रार्थं। भिन्नो वेदेः प्राग्वंशोत्तरवेदिसमीपदेशेनेन न तदर्थं स्तरणं न तदंगं च मंत्रोऽप्यावर्तेत। असमासमाप्तौ वेदिवैगुण्यापादग्नीषो
मीयहविषामासादनं विगुणं स्यात्। भवतु वा बर्हिरर्थं स्तरणं बर्हिष्प्रस्तीर्णे हवींषि साह्यासाद्यन इति नयापि तदावृत्तेस्तदं
गमंत्रावृत्तिः। अन्यथा त्वमंत्रास्तीर्णे हवींषि साह्यासोदेयन इति नयापि तदावृत्तेस्तदंगमंत्रावृत्तिः। अन्यथा त्वमंत्रास्तीर्णे
बर्हिषि हवींषि सादयेरन्॥ १८॥ सन्नहनहरणेन यतिवेन। नदेवबर्हिः प्राग्वंशस्तीर्णं पुनः सन्नास्योत्तरवेदिसमीपे स्तीर्यते
। प्रकृतौ सन्नहनमंत्रः पूषा ते ग्रंथिं ग्रथ्नात्विति। तथा हरणमंत्रः बृहस्पतेर्मूर्ध्ना हरामीति। तौ किमस्मिन्संनहने हरणे
च पुयो कृत्यौ नेति संदेहे संनहनहरणयोरावृत्ते मंत्रधारयिपूर्ववदावृत्तिः स्यात्। मैवं। प्रकृतौ हि लवनस्य बर्हिषो यद्विहारदेश
प्रापणार्थं संनहनं हरणं च तदर्थौ वेतौ मंत्रौ। विहारदेशं प्रापितस्य बर्हिषो वेदिप्रापणार्थमेतत्। अतोऽन्यकार्यत्वात्कार्य
प्रयुक्तत्वाच्च मंत्रयोर्न मंत्रप्रयोगः। यथा प्रकृतौ वेदगार्हपत्यादाहवनीयं नीयमाने बर्हिषि मंत्रो न प्रयुज्यते तथेहापि॥ २१॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥इति श्रीपार्थसारथिविरचितायां शास्त्रदीपिकायां द्वादशस्य प्रथमः पादः॥ विहारो लौकिकानामर्थे साधयेत्प्रभुत्वात्॥ गा
१ पार्वणस्थालीपाके र्हपत्ये साद्यग्निः किं लौकिकानां नानापचनप्रकाशनादीनां चरुपुरोडाशहोमहविःश्रपणादीनां च सर्वेषामग्निकार्याणामं वैदिकानां च
गं उत वैदिकानामेवेति संशये सामर्थ्यात्सकाह्निगान् मांसपाकनिषेधदर्शनाच्च सर्वार्थतायां प्राप्तावुच्यते। गार्हपत्ये हवींषि श्र
९ पयन्ति दक्षिणाग्नावन्वाहार्यं पचन्ति आहवनीये जुह्वतीति प्रत्यक्षवचननिर्दिष्टैरेव प्रयोजनैर्निराकांक्षाणां नान लिंगे
न सर्वार्थता शक्या कल्पयितुं। मांसपाकप्रतिषेधस्तु वैदिकवपाश्रपणाद्यर्थोपपन्नः। स्थालीपाकादयस्त्वौपासने विहि ढच ह्यग्नै
तानसामान्यविहितानां गार्हपत्यादीन् गच्छन्तीति तस्माद्वैदिकानामेव विहारोऽङ्गं। पूर्वं बर्हिःसंस्काराणां साधारण्यासाधारण्ये
विचारिते तत्प्रसंगादग्नीनां लौकिकालौकिकसाधारण्यं विचारितमिति संबंधः॥ १॥ सवनीये छिद्रापिधानार्थत्वात्पशुपु
रोडाशेन स्यादन्येषामेवमर्थत्वात्। सवनीयपशावग्नीषोमीयात्पशोश्चोदकप्राप्तः पशुपुरोडाशः कर्त्तव्यो नेति संशयेन
कर्त्तव्यः। स हि प्रकृतौ छिद्रापिधानार्थः। सुषिरा वा एतर्हि पशुर्यर्हि वपामुत्खिदन्ति यद्व्रीहिमयः पुरोडाशो निरूप्यते अ ८

पिहिसाऽच्छिद्रतायाः इति। सवनीयपशौ च सवनीयैरेव छिद्रापिधानं कृतं। तत्रापि हि श्रूयते अनुसवनं सवनीयाः
पुरोडाशा निरूप्यन्ते अपिहिसाऽच्छिद्रतायाः इति तस्मात्तैरेव कृतकार्यः पुरोडाशो निवर्त्तते। ननु पुरोडाशेन मा
ध्यंदिने सवन इष्टिर्लिंगात्कर्त्तव्यः। एवं न हि विकल्पोऽस्तु। मैवं। अर्थवादमात्रं छिद्रापिधानानुवचनं प्रत्यक्षविरोधा
त्। देवतासंस्कारार्थस्त्वसौ। तस्मात्कर्त्तव्य एव। लिंगं च पुरोडाशेन माध्यंदिन इति तेन पाक्षिकं कल्पयितुं शक्यं॥२॥ ह
विष्कृन् सवनीयेषु न स्यात् प्रकृतौ यदि सर्वार्थापशुं प्रत्याहूता सा कुर्यात् ह्रियमानत्वात्। प्रकृतौ पात्रप्रोक्षणानंतन
रमवघातकाले तस्मिन्काले त्रिरवघ्नन्नाह्वयतीति हविष्कृदाह्वानं तदा ज्योतिष्टोमे सान्नाय्यानीसर्वेषामंगमिति स्थितं त्वा
विं सने। तदा हि सान्नाय्यविकारे पशावपि पात्रप्रोक्षणानंतरमस्तिह विष्कृदाह्वानं अनश्च सवनीयपश्वर्थेन तदीयपा
त्रप्रोक्षणानंतरमाहूता हविष्कृत् तन्मध्यपातिनां सवनीयपुरोडाशानां प्रसंगसिद्धे न पृथगाह्वानव्यतिसिद्धमेवोत्त
रविवक्षया प्राप्यते॥३॥ पशौ नु संस्कृते विधानात्तार्तीयसवनिकेषु स्यात्सोम्याश्विनयोश्चापद्वत्कत्वात्। संतितत्तीयस

© Dharmartha Trust J&K. Digitized by eGangotri

वनेसवनीयाः पुरोडाशाः सौम्यश्चरुराश्विनश्चद्विकपालः । तेचसवनीये पशौ पक्वे क्रियंते तेषु किंहविष्कृदाह्वानव्याउतपाते
१० शुकेयवप्रसज्यनइति संदेहे हविष्कृनसमा... हविष्करणमेवनः कार्यं अतः पक्वे पशौ तद्यथा हविष्कृत्तं कार्यत्वादृत
क्केतिनतः परेषुपुनराहूनव्येति प्राप्ते ब्रूमः । सांनाय्यकरणमाह्वानस्यकार्यं सामर्थ्यान्न केवलं हविष्करणमेव । मुख्य
त्वात्तु हविष्करणे न समाख्यायते । तेनाह्वानासंगी प्रागुक्तान विधानान्तो सानुमर्हतीति पक्वतोनुपत्नीसंयाजेभ्यः । पश्चात्
त्तुष्टानं विहितमिति सवनीयेपि पशावापत्नीसंयाजेभ्यः पश्चात्तदनुष्ठानं विहितमिति सवनीयेपि पशावापत्नीसं
याजेभ्यः सन्निहिते निनितत्कालवर्त्तिनां सवनीयसवनिकानां न तदेनाह्वानव्या ॥ ७ ॥ निशियज्ञेप्राकृतस्याप्रवृत्तिः प
समशिष्टत्वात् ॥ काम्यास्तिष्टिषु श्रूयते अग्नये क्षामवते पुरोडाशमष्टाकपालं निर्वपेद्योरसोम्यो विभियादिति तानन्नायपवं
सैवनं अमावास्यायां निशि यजेतेति । तस्मिन्निशि यज्ञे विंसते । किं प्रयकृतं तंत्रं कर्त्तव्यमुत दर्शिकमेव तंत्रं प्रवर्त्तत इ
ति ॥ तत्रामावास्यायां निशीति सामानाधिकरण्यात्कालवचनो मावास्याशब्दो न कर्मवचनः । कालश्चानपेक्षः ॥ प्रवर्त्ते १०

© Dharmartha Trust J&K. Digitized by eGangotri

नो कर्मणोनुकालापेक्षात्वात्तिरतोपि कालवचनः। तेन वाक्यात्तावन्मामावास्याकर्मणामुपस्थानं। नापि प्रकरणात्। तद्भा
ना वात्। अतोत्लोच्यदर्शे विधीयमानानिष्टीष्टिस्तंत्रोपजीवनासंभवान्नसांगयुक्तैव निशायां कर्त्तव्यतया विधीयते इति ना
स्ति प्रसंग इति प्राप्ते ब्रूमः। यद्यपि वाक्यात्प्रकरणेन वा नोपस्थानं न चापि यस्मिन्काले विधीयते सनाव नियमेन प्रवृ
त्तामावास्यातंत्रएव। तेन तत्र विधीयानेष्टिस्ततंत्रमध्यविहिता भवति। अवश्यं चार्यस्वभावावगतमप्यमावास्यातंत्रमा
लोच्यैव निशीष्टिर्विधातव्या। अन्यथाग्निप्रणयनतोयासनादिक्रमपि विरुध्यात्। न वाशक्यं। प्रणीतानामग्नीनां पुनः
प्रणयनासंभवादुपेनस्य च वनस्यानुत्सृष्टस्य पुनरुत्सेतुमशक्यत्वात्। तस्मादालोच्यैव दर्शतंत्रं धीयमानेष्टिर्यत्नतउपजी
वितुमशक्यमिध्माबर्हिः सामिधेन्यादि न मात्रं स पंत्रयुंक्ते। अन्यत्तु दार्शिकमेवोपजीवति। विकृतंसंतराणि तु सौर्यादीनि
पौर्णमास्यमावास्ययोर्विधीयमानान्यपि न पुरूच्चतंत्रायां प्रकृतौ विधीयंते। प्रागेव प्रकृत्यारंभात्तदनुष्ठानसंभवात्।
इयं तु निशायां विधीयमानानंत्रमध्यपातिनी प्रसंगमुपजीवति नो प्रसंगमुपजीव्र तिवैषम्यं। ५॥ आरंभणीया विकृतौ

© Dharmartha Trust J&K. Digitized by eGangotri

तस्मात् प्रकृतौ कालमध्यत्वात् कृतात्पुनःस्मरर्थैना सौर्यादिष्वारंभणीयास्यात् वैतिविचारे तस्यादितिक्रमः। प्रकृतौ हि स
११ कृद्देवेयं कर्त्तव्यानपतिपत्तियोगमावर्त्तनीयेत्युक्तं नवमे। यदि च सकृत् कृतयैवानया संस्कृतः पुरुषो यावज्जीवं संस्कृ
तएव भवति ततोस्याः सकृत्करणं युक्तं। अपद्रं तेतु ततसंस्कारेपुनः पुनस्तत्सिध्यर्थमनुष्ठानयास्यात्। तेनप्रकृतस
र्थकृत एवसंस्कारोऽनपवृक्तः प्रसंगेनविकृतीनामुपकरोतीति ततास्वारंभणीयाकर्त्तव्या उच्यते। नसंस्कारावस्थाना
सकृतावनावृत्तिः किंत्वारंभैक्यात्। आद्याहि कर्तुःप्रवृत्तिरारंभः॥ सचैकस्य कृतोरेक एव। अतस्तदपवर्गे पद्वज्ञनएवतद
र्थः संस्कारः। पुनःपुनः प्रयोगे हि प्रयोगाएव भिद्यंतेनक्रत्वारंभः। क्रत्वारंभागंचारंभणीयादर्शपूर्णमासप्रकृस्यक्रतु
वचनत्वात्। तस्मात्नपुनःपुनःप्रयोगेत्वारंभणीया। विकृतिषु त्वारंभभेदाद्वोद्दकप्राप्तारंभणीयाकर्त्तव्येवारंभवेलायां
॥६॥ विप्रतिषिद्धधर्माणां समवाये भूयसांस्यात् सधर्मत्वं। पंचदशरात्रेग्निष्टुत्प्रथममहः। तत्रैकाहाग्निष्टुद्धर्मा नामधेय
तप्राप्यंते। तेनाग्नेयीतत्रसुब्रह्मण्या। ततोज्योतिर्गौरायुरिति त्र्यहः। तत्र ज्योतिरादिनामधेयैरेकाहज्योतिरादिधर्मप्राप्तिः ११

© Dharmartha Trust J&K. Digitized by eGangotri

तेन नैषैवं द्वीसुब्रह्मण्या। परिशिष्टान्येकादशाहानि द्वादशाहिकानि। नैषष्ठ्यैं ज्योव। रहचोदकप्राप्तैर्द्वी धर्मकाणामेकादशा
नामहूं नाम प्रासाग्नेयी धर्मकस्य चा ष्टुतो विरोधे विसने। यद्वा नाम्नामेव ज्योतिरादीनामग्निष्टुत श्च मिथश्चिंतानां
त्रैपसत्कालसुब्रह्मण्यायां नंत्र भ नायां किमनियमः उताग्नेयी ग्यास्या अथ चैं द्वीति। तत्रानियमे मुख्यत्वाद्वाग्निष्टुध
र्मानुग्रहे प्राप्ते भयसांसाधर्म्यायैं द्वीति सिद्धांतितं। न त्विह सुब्रह्मण्योदाहरणं युक्तं॥ यत्रान्यार्थेनान्यस्योपकारे हि स्तत्र प्र
संगः। न चाग्नेय्यासुब्रह्मण्ययाद्वंद्वः संस्कृतो भवत्यैं ग्रावाग्निः। अत एव न तंत्रं। नैनोभाव्यपि भेदे नाह्वानत्याविस्तनुदाहरणं
। काम्यासिष्टिषु श्रूयते। अग्नये दात्रे पुरोडाशमष्टाकपालं। दधिमधुघृतमापो धानास्तत्कं सृष्टं प्राजापत्यं पशुकामः इति
। तदिमानि सप्त हवींषि आग्नेयं मैद्रं प्राजापत्यानि यं चेति तत्राग्नेयं प्राजापत्यं साम्य धाना आग्नेयविकारत्वादुभयथाप्यवि
रुद्धाः। यस्त्विन्द्रः पुरोडाशो यव प्राजापत्यं दध्नि तयोरैन्द्राग्नसान्नाय्यविकारत्वाद् मावास्याधर्मापेक्षा। मधुघृतयोर्नानूपांशुयाज
विकारत्वात् पौर्णमासिकधर्मापेक्षा। मधूदकयोरा ज्यविकारत्वमष्टमे सिद्धं घृतस्य तत्संदिग्धमेव। न दर्शेतेषु समस्तसुयागेषु सह

निर्वपेदिन्द्राय प्रदात्रे पुरोडाशमेकादशकपालं

© Dharmartha Trust J&K. Digitized by eGangotri

त्रयाणां प्रकृतेषु पौर्णमासीविकाराणां वार्त्रघ्नावास्याभागमंत्रौ प्राप्तौ। दर्शविकारेषु स्तुद्धपोर्णधन्वंतौ। न चान्यतराभ्यां कृतावाज्य
१२ भागौ पुनर्मन्त्रार्थमावर्त्तेतां यौ। न हि हविर्मभावास्यामंत्राभ्यामाज्यभागौ कार्यौ नाभ्यामेव च प्रसंगसिद्धकार्यत्वात् पौर्णमा
सिकौ मंत्रौ निवर्त्तेते अथवा विपर्यय इति संदेहे अनियमः मुख्यत्वाद्द्वंद्वभोस्तद्धर्मानुग्रहे प्राप्ते क्रमः। भूयसां मघाही
नां धर्मौ वार्त्रघ्नावनुग्रहीतव्यौ। यद्यपि मुख्यधर्मः प्रथममवगम्यते तथापि पश्चाद्भूयोनुग्रहमात्रो यवाध्यते। सोयं
प्राप्तबाधः। तस्मात् पौर्णमासिकौ धर्मावनुग्रहीतव्यौ॥ ७॥ मुख्यं वा पूर्वचोदनाल्लोकवत्॥ यत्र समसंख्यानां धर्मविप्र
तिषेधः तत्रैकस्य स्वधर्मलाभः कस्य वान्यधर्मोपजीवनमिति चिंतायामनियमप्राप्ते मुख्यस्य स्वधर्म्यमित्याह। तस्य
हि धर्मोसंजातविरोधावस्थायां निर्विघ्नमवगम्यते। जघन्यस्य तु न द्विरुक्तान्नधर्मः संग्रहीतुं शक्यते। न चात्रावगत
स्य सागेऽनवगतसंग्रहे च किंचित्कारणं भूयस्त्वं प्रधानधर्मत्वं वास्ति। तस्मादत्र मुख्यस्य स्वाधर्म्यमिति। किमिहोदा
हरणं। अध्वरकल्पायां प्रथमे आग्नावैष्णवं द्वादशकपालं निर्वपेद् परा हे सरस्वती माज्यस्य भूद्वापजेनेति। तत्राग्नावैष्ण १२

© Dharmartha Trust J&K. Digitized by eGangotri

वसोमध द्रव्यकत्वाद्धिरेव स्यात्तद्वारा शकपालत्वे रैंद्राग्नविकारत्वाद्द्विशकंनंत्रं। आज्यस्यत्र्यंशुयाजविकारत्वात्सौर्ये
मासधर्मापेक्षातत्र पूर्ववदाससभागमंत्रयोर्विरोधे मुख्यधर्मत्वाद्धनसौम्यहीनत्ये। ऐकाधिकरणार्थं त्वेकीयमतत्वेनोप
न्यासादन्याप्यत्वाच्च परमतमेव। तस्य सवैगुण्यसंभवति भूयोवैगुण्यंप्रयोगवचनः क्षमते। अवगतमपिहिकारणांत
रवशाद्बाध्य तएव। यथोपरितनेधिकरणे मुख्यमपिदीक्षणीयाधर्मत्वं बाधित्वा प्रधानधर्मत्वबलेन सुत्याकालएवा
नुग्रहीष्यते। तथाभूयस्त्वेनापि। तस्मात् द्वितीयाधिकरणे॥ २॥ अंगगुणविरोधेचतादर्थ्यात्॥ दीक्षणीयायाः सोमस्य
च यद्दक्षापशुनासोमेनेत्यादिनावचनेन पर्वकालत्वप्राप्ते सत्येकादिदीक्षापक्षे द्वयोः कालासंभवात्कस्यकालेनु
गात्व्य इति विचारे ऽनिपमेमुख्यत्वाद्दीक्षणीयाधर्मानुग्रहे प्राप्ते प्रधान धर्मत्वात्सुत्याकालानुग्रहः। सर्वाणि ह्यंगा
नि नरंगानिच प्रधानसाद्गुण्यापत्त्यि यंते। नचसाक्षात्साद्गुण्यसंभवेपरंपराश्रयति। तस्मात्प्रधानकालानुग्रहो
पंचाशत्त्वाधर्वितापीयं विप्रतिषिद्धधर्मसमवाय प्रसंगादिहकृता॥ १०॥ परिधिर्द्व्यर्थत्वादुभयधर्मास्यात्। परि

© Dharmartha Trust J&K. Digitized by eGangotri

धौपर्शुं नियुंजंतीति परिधानं यूपकार्ये च कुर्वन्त्यपरिधिः। परिधिधर्मान्तमार्जनादीन्यूपधर्मांश्च परिव्याणादीनूलभेतेति
१३ प्राप्तिसूत्रमेनन। यौप्यस्तु विरोधे स्यान्मुख्यानंतर्यात्। विरुद्धेषु धर्मेषु किं यूपधर्माः कर्तव्याः परिधिधर्मा वेति संशये यूप
13 स्य हविषा प्रत्यासन्नत्वात् संबंधास्तु धानप्रत्यासत्तिः। परिधेस्तु हविराधाग्निसंस्कारार्थत्वाद्विप्रकृष्टत्वेन यूपधर्मानुग्र
हः पूर्ववत्प्रधानप्रत्यासत्तेरिति प्राप्ते ब्रूमः। परिधेः सतो नियोजने विधानादपरिस्य तत्स्वधर्मे परिधौ नियुंजीतेति नियो
जनमात्रं सूत्रवाचनिकं। तस्मायुक्तास्तु तन्त्रक्षणादिधर्माश्चोदकेन प्राप्नुवंतः परिधित्वानुपमर्देन भवितुमर्हंति। समा
मपि च प्रत्यासत्तावंगधर्मत्वमुभयोरविशिष्टं। तस्माद्विरोधेपि परिधिधर्माः कर्तव्याः॥ १९॥ पशुसवनीयेषु विकल्पः स्यादै
कृतत्वादुभयोरेकतिभूतत्वात्। सवनीयः पशुः प्रातःसवने प्रारभ्य तृतीयसवने समाप्यते। तथा प्रातःसवने चरंति
पुरोडाशेन माध्यंदिने च तृतीयसवने इति। सवनीयाः पुरोडाशाः पुनः सवनं विहिताः। अनुसवनं सवनीयाः
पुरोडाशान्निरुप्यंत इति माध्यंदिनीयानां तार्तीयसवनिकानां च पुरोडाशानां तंत्रमध्यपातादसंदिग्धं प्रासंगिक १३

© Dharmartha Trust J&K. Digitized by eGangotri

तं। प्रातःसवनिकानां पशोश्च मिथश्छिन्नत्वात्किं पुरोडाशस्तंत्रिणः पशुः प्रसंगी विपरीतं वेति। यस्य पूर्वमुपक्रमो यस्य वाप
श्चात्समाप्तिः स तंत्री इतरस्तु प्रसंगी। न त्वेह कस्य प्रथममुपक्रमः इति विशेषो नावगम्यते। ननु समाप्तावस्ति विशे
षः पशोस्तृतीयसवने समाप्तत्वेन स एव तंत्री स्यात्। प्रातःसवनिकपुरोडाशा हि प्रातःसवने समाप्यंते अतस्ते प्रसं
गिनः। मैवं। तेपि तृतीयसवने समाप्यंते आग्निमारुतादूर्ध्वमनुयाजैश्चरंतीति पौरोडाशिकानुयाजोत्कर्षविधिरस्ति
ति मन्यते। तस्मादविशेषः। उच्यते पशुरेव तंत्री तत्र ह्यग्निमद्य होतारमवृणीतायं यजमान इत्यादिसूक्तवाकप्रैषो
मैत्रावरुणकर्तृकोग्नीषोमीयस्य पशोश्चोदकेन प्राप्तः पुनरग्निमद्य होतारमवृणीतायं सुतासु तीयजमाये न इत्यादि
रूपेण विकृतः प्रसंगेन सवनीयपशोः पठ्यते। सोयमनर्थकः पुरोडाशानां तंत्रित्वे स्यात्। नहि तेषामयमंगं। नापि मै
त्रावरुणस्तेषामस्ति येनापमुच्येत विकृतोपि निसवह्वचनानर्थक्यं। तस्मादनेन पशुर्वैशेषिकांगाम्नातेन पशुरेव तं
त्रीति निश्चीयते। किंच आग्निमारुतादूर्ध्वमनुयाजैश्चरंतीत्ययमपि पाशुकानामेवानुयाजानामुत्कर्षः। तेषां ह्यंगेस्त

© Dharmartha Trust J&K. Digitized by eGangotri

तीयसवनेऽसंगप्रचारोत्कर्षादेव तृतीयसवनसंबंधे प्राप्ते प्रदेशाद्विशेषमात्रं श्रुतेन विधीयते। पुरोडाशानां त्वनुस
१४ वनं निरूप्यं न इति वचनात्सान्नाय्यः सवने समाप्त्यवगमात्तद्विरोधेनायुक्तं नदीपान्त्याजोत्कर्षविधानं। तस्माद्दीर्घकालत्वा
न्नूपशेषस्तंत्रिनानन्मभपानात्तु पुरोडाशाः प्रसंगिनः॥ १२ अपूर्वं च विकृतौ समानतंत्राचेदनि[illegible]त्वादनर्थकं हि
स्यात्। प्रकृतिर्यावज्जीवं पर्वणि पर्वणि प्रदीयायुज्यते। विकृतयोपि कामेन निमित्तेन वा पर्वण्येवापतंति। तत्र प्रकृ
तेरस्तंत्रेण प्रयोगं कृत्वा चिंत्यते विरुद्धेषु धर्मेषु राज्ञी सामिधेनीसादिषु कस्य धर्मः प्रयुज्यते कस्य प्रसंगित्वमि
ति संशये प्रकृतेः पूर्वं प्रकृतत्वात्सैव तंत्रिणीति प्राप्ते ब्रूमः। यद्यपि तावत्पूर्वं प्रवृत्ता प्रकृतिः स्यात्तथापि वैकृतमेवानु
ष्ठेयं। इतरथा सर्वदैव प्राकृतानां प्रयोगाद्वैकृतानां विशेषविधयोऽनर्थका भवेयुः न च पूर्वं प्रवृत्ता प्रकृतिः। न ह्यप्रमेका
यावज्जीविकः प्रयोगः। पर्वणि पर्वणि भिन्नाः प्रयोगाः प्रकम्यंते प्रवृज्यंते च न तस्मात्कामेन निमित्तेन चापतंती
विकृतिरेवोत्सर्गिकीं क्षिप्रचिकीर्षां बाधित्वा निविशत इति वैकृतमेव तंत्रं प्रकृतौ प्रसज्यते॥ १४॥ अधिकश्च गुणः १६

© Dharmartha Trust J&K. Digitized by eGangotri

साधारणे विरोधान्न कांस्यभोजिवन्मुख्येपि। आग्रयणे ह्यामैन्द्राग्नवैश्वदेवद्यावापृथिव्यानि हवींषि। तत्र द्यावापृथि
व्यस्य वैश्वदेविकद्यावापृथिव्यविकारत्वात्प्रस्तरं तं बर्हिः प्राप्तमैन्द्राग्नादेस्तु प्रस्तरमप्रस्तरं वा बर्हिमानं तत्रेषु किं प्रस्तर
मप्रस्तरं वोपादेयमुत प्रस्तरमेवेति संशये मुख्यत्वाद्भूयस्त्वाच्च नियम एव युक्तः। मैवं न ह्ययं नियमो नाम किंचिदङ्गं परन्तु
गृह्यतां बर्हिर्मात्रत्वंगं। न च प्रस्तरेणोपादानेप्यविरुद्धमिति न कस्यचिद्वैगुण्यं। अनियमे तु द्यावापृथिवीयस्य वैगुण्यं स्यात्।
न चाव्वैगुण्यसंभवेन युक्तं। तस्मात्प्रस्तरमेव स्यात्॥ १४॥ तस्य हृत्यानुतं त्रिनियमः स्याद्यथापायुक्तं सक्तवाकेन॥ एवं त
स्नेनैव द्यावापृथिव्यमंत्रलिंगभूतेनैव हर्षासर्वमेवैन्द्रं द्यावापृथिवीयमंत्रं ऐन्द्राग्नादिस्तुतदेवतं तत्रं प्रसज्यते। अतो
विरुद्धेष्वपि धर्मेषु द्यावापृथिवीयत्वस्यानाभेवं। न ह्येतदैन्द्रकांतिकं द्यावापृथिवीयमंत्रलिंगं साधारणमिदमविरोधा
त्संगृहीतं। न त्वनेन द्यावापृथिव्यं तंत्रनियंतुं शक्यं। तस्मात्सर्वतंत्रिणाम् इति विरुद्धेषु धर्मेष्वैन्द्राग्नादि धर्मः कर्तव्या मु
ख्यभूयस्त्वाभ्यां॥ १५॥ ॥इति श्रीपार्थसारथिमिश्रकृतायां शास्त्रदीपिकायां द्वादशस्य द्वितीयः पादः॥ ॥विश्वजिति

© Dharmartha Trust J&K. Digitized by eGangotri

वस्त्रत्वम ... स्मिन्नरेषु तंत्रभूयस्त्वादहर्गणमात्॥ अथ रात्रे विश्वजित्प्रथममहः। ततोभिप्लवः षडहः। ततोभिजित्। त
१५ त्र विश्वजितिनामधेयेनैकाह विश्वजिद्धर्मो ... थाउर्हे स्वबन्धत्वं ... धत्त इति वस्त्रत्वकल्पितः। इतरेषु ज्योतिष्टोमादिह
तं वासः। तत्र द्वयोः परिधानार्थत्वान्महाव्रतनाम्नो दिवं वासांसि विभ्रंसयनीत्यादिवासोवहुत्वादर्शनात् समुच्चये भूयो
15 धर्मत्वादहर्गणानुग्रहः। एकाधिकरणपक्षवादिमते तु सन्नाम्नयाकरणं भाष्यकारेणादर्शितं। सिद्धान्तस्तु। सत्येन दृष्टं वासो
वहुत्वं तथापि कौपीनाच्छादने वस्त्रत्वं चोऽयोग्यत्वादुपरिवासः कार्यः सो विधीयते। तत्रापि हि परिदधाति प्रयो
गात् कं वत्सं परिधत्त इति दृष्टं। अहतं तु कौपीनाच्छादनयोग्यं न चैव विधीयत इति द्वयोरपि भिन्नकार्यत्वात् समुच्चयः॥१॥
अनुनिर्वाप्येषु भूयस्त्वेन तंत्रनियमः स्यात्॥ अग्नीषोमीयस्य पशुपुरोडाशस्य मध्ये हे वसुवाह वीष्यनुनिर्वपतीत्यत्रा
नुनिर्वाप्याणां स्वधर्म्यपुरोडाशस्य प्रसंगित्वं विपरीतं वेति संशये भूयस्त्वादनुनिर्वाप्यानुमिति प्राप्त उच्यते। नहि तेषां स
हचोदनापि सहोपक्रमः किन्तु पशुपुरोडाशतंत्रे प्रक्रान्ते अनुनिर्वाप्याणां तंत्रमध्ये विधानाद्विस्पष्टं प्रसंगित्वमितरस्य १५

© Dharmartha Trust J&K. Digitized by eGangotri

च नेत्रित्वं । नेत्रित्वं । नेत्रिधर्मस्य प्रसंगिभिरुपजीवनीयत्वान्निपशुपुरोडाशस्य साधर्म्ये येनु सर्वेषामपि नैत्रिषु विपु निवि

द्ध विषये मुख्यस्यैव साधर्म्येन भूयसामित्यैकाधिकरण्यमाश्रित्य वर्द्धंति नेषां प्रसंगिभ्यो नु निर्वाप्येभ्यो मुख्यबलीयस्त्वं

विष्यष्टमित्यधिकरणमिदमनर्थकं स्यात् । एकाधिकरण्यमेव विस्पष्टीकर्तुमिदमधिकरणमिति चेन्न तुल्यत्वाश्र

न्यानां वैजात्यभाषितं । किं च । विप्रतिषिद्धधर्माणां समवाये भूयसां साधर्म्यं मुख्यं वा स्वधर्मेति सामान्येनोक्तानुनिर्वाप्ये

ष्विति विशेषमुपादाय न हि पयेभ्यो भ्योपि मुख्यबलीयस्त्वमित्यभिधानात् त्रिसमवाये भूयसामेव स्वधर्मत्वं मुख्यसाध

र्म्यं च सममसंख्यविषयमित्यधिकरणभेदादेव स्पष्टीभवतीत्यैकाधिकरण्यमित्यास्तां तावत् ॥ २ ॥ एककर्मणि शिष्टत्वाद्गु

णानां सर्वकर्म स्यात् ॥ दर्शपूर्णमासयोराघारोपक्रमस्य श्रूयते ऊर्ध्वमाघारयति ऋजुमाघारयति संततमाघारयतीत्या

दि तत्रोर्ध्वत्वादीनां विकल्पसमुच्चयचिंतायामेकार्थत्वाद्विकल्पप्राप्तौ सर्वेषां सह संभवात्समुच्चयः ॥ ३ ॥ एकार्थास्तु वि

कल्पेरन् समुच्चये ह्यावृत्तिः स्यात्प्रधानस्य ॥ व्रीहिभिर्यजेत यवैर्यजेतेत्यादिष्वपि सर्वांगोपसंहारि प्रयोगवचनानुग्रहा

© Dharmartha Trust J&K. Digitized by eGangotri

पाष्टदोषनिदानविकल्पपरिहाराय चसमवायः स्यात्। संभवति न ज्योतिष्टोमवदभ्यासमाश्रित्य समुच्चयसंपादनं
१६ मिश्रैर्वैज्यनामिति प्राप्ते ब्रूमः। एकार्थानामेकस्मिन्नुपकारेऽन्योन्यानपेक्षाणां विनियुक्तानां विकल्पः स्यात्। ज्योतिष्टोमा
16 दिद्रव्यदेवतासंयोगानामदृष्टार्थानामपूर्वीयविध्यनात्मकरणेन युगपद्ग्रहणात् सर्वसंपादनापयुक्तं पदाभ्यास
ने। व्रीहियवौ तु द्वाभ्यां वाक्याभ्यामन्योन्यनिरपेक्षौ यागप्रयुक्तपुरोडाशप्रकृतितया विधीयमाणौ न द्वारेण प्रयोगवचनो
गृह्यमानपर्यायेतौ वग्रहानि न युगपदनूयेन बलात्प्रधानाभ्यासंस्थान ज्योतिष्टोमवत्। मिश्रत्वमपि निरपेक्षविधानादयु
क्तमेव। समुच्चियजनापि वाक्यद्वयमपि बाधितं स्यात्। द्वाभ्यामपि वाक्याभ्यां द्वयोरपि निरपेक्षयोः प्रकृतित्वेन विधा
नाच्च द्वन्द्वेन द्वयोर्न निवृत्तिप्रतीतेः। तस्माद्विकल्पः। ततो व्रीहिप्रयोगे तैरेव कार्यसिद्धेर्यवानामनुपादानं। यथा पाशु
केरंगैः कार्यसिद्धेः पौरोडाशिकानां। ननु बाध्यार्थे नान्यस्य कार्यसिद्धिः प्रसंगः। साधारणं भवेत् तंत्रं परार्थैत्व प्रयोजकः। एव
मेव प्रसंगः स्याद्विद्यमाने स्वके विधाविनिवचनात्। अत्र तु द्वयोरप्याग्नेयार्थत्वान्नास्ति प्रसंगरूपं। सत्यमेतावान् विशेष १६

© Dharmartha Trust J&K. Digitized by eGangotri

त्तयावि १

स्त्वयाप्यन्येन कार्यसिद्धेरन्येस्य निवृत्तिरित्येनावतासामान्येनात्र संगतिः ॥ ४८ ॥ प्रायश्चित्तेषु चैकार्थ्यान्निष्पन्नेनाभिसं
योगस्तस्मात्सर्वेषु निर्णयः । यानि प्रायश्चित्तानि कर्मवैगुण्यनिमित्ते विधीयन्ते । यथा यदृक्तो यज्ञ आर्त्तिमियाद्भूः स्वाहेति
गार्हपत्ये जुहुयात् । योमावास्यां पौर्णमासीं वातिपातयेदग्नये पथिकृते पुरोडाशमष्टाकपालं निर्वपेत् । योमावास्यां पौर्णमा
सीं वातिपातयेद्वैश्वानरं द्वादशकपालं निर्वपेदित्यादि वैगुण्यसमाधित्सायां विधानात्समाधानार्थानि यान्येकस्मिन्वैगुण्ये
विधीयन्ते । यथैष्टि वैश्वानरादीनि तेषां विकल्पसमुच्चयविनायामहत्त्वार्थत्वात्समुच्चय एव सावकैकेन वाक्ये न वैगुण्यसमाधाना
य निरपेक्षविधानाद्विकल्पः ॥ ४९ ॥ समुच्चयस्तु दोषाणां निर्घातार्थेषु ॥ यानि पुनर्न दोषनिर्घातार्थानि निमित्तकर्मांगानि तेजु
होतीत्यादीनि तेषां प्रयाजादिवदुपयोपविधानात्समुच्चय इति प्रसुदाहरणमैमात्रमेतत् ॥ मंत्राणां कर्मसंयोगे स्वधर्मे
ण प्रयोगः स्याद्धर्मस्य तन्निमित्तत्वात् । एवं पिनाध्येतव्यमित्यादयोपि मंत्राणामध्ययनकाले स्वधर्मास्ते कर्मकालेपि स्युर्ने
वेति संशये मंत्रप्रयोगार्थत्वात्कर्मकालेपि प्रयोगात्तत्रापि स्युः । नैवं । प्रकरणान्तरे नेधर्माः स्वाध्यायविधिविहितस्य ग्रहणार्थस्याध्य

© Dharmartha Trust J&K. Digitized by eGangotri

यनस्याविघ्नसमाप्त्युपकारेणांगभूताः। कः प्रसंगो यत्कर्मणि धर्मोद्वरः। पूर्वपक्षे विधीयमानानां धर्माणां मंत्रप्रयोगार्थत्वेन
१० कर्मकाले विप्राप्तेस्तद्विधयः स्वाध्यायसमयवर्तिन एव प्रसंगात्कर्मकालेऽप्युपकुर्वंति सिद्धांते तु नैवंविधप्रसंगाप्रसं
गविचारासंगतिः॥ ४॥ भाषास्वरोपदेशे चैरनध्याय च न प्रतिबंधः स्यात्। ये मंत्राः समाम्नाये स्वरांतरेण समाम्नाता ब्राह्मणे
समाम्नाय स्वरांतरेणोपात्तास्ते किं स्वसमयसिद्धेन स्वरेण प्रयोक्तव्या उत ब्राह्मणस्वरेणेति संशये वाचनिकत्वाद्ब्राह्मणस्वरस्यैतेनैव
17 व प्रयोगः। मैवं। यतो वल्लिंगविनियुक्ता मंत्रा तेषां ब्राह्मणस्य गुणार्थवादपरिसंख्यार्थत्वान्न मंत्रस्वरूपेण स्वरेणाव्यापा
रः। येऽपि वचनविनियोज्यास्तेष्वपि मंत्रविनियोगपरं वचनं न तत्स्वरविनियोगे व्याप्रियते। स्वरांतरोपादानं तु ब्राह्मणप्र
वृत्तस्य स्वरस्याविच्छेदार्थं। तस्माद्दाक्षीपेनैव स्वरेण कर्मणि प्रयोगः। तन्न्यायत्वाद्दृष्टेष्वेवं। येषु तु मंत्रसमाम्नायेनाधी
ता ब्राह्मणोत्पन्ना मंत्रास्तेष्वपि ब्राह्मणस्य मंत्रस्वरूपविनियोगपरत्वान्न स्वरपरत्वं। अतो न ब्राह्मणस्वरेण प्रयोक्तव्याः। नै
वं। अस्मत्स्वपि स्वरविनियोगे मंत्रस्य विनियुक्तस्य यथाविज्ञानरूपस्य प्रयोगात्तस्य च ब्राह्मणस्वरातिरेकेण स्वरांतराभा १०

© Dharmartha Trust J&K. Digitized by eGangotri

वगमात्रेणैवस्वरेण प्रयोगः ॥ ८ ॥ मंत्राणां करणार्थत्वान्मंत्रांतेन कर्मादिसन्निपातः स्यात्सर्ववचनार्थत्वात्। करणमं
त्रेषु किं मंत्रं मध्ये मंत्रांतेन तोपि वा क्रियं तर्हि तत्कालं स्थित्वा समवेतानामभिधापि पक्षानंतरं वा कर्मप्रयोगः किं वा सर्वमंत्रांतेनंतर
रमेवेति संशये अनियमः समवेताभिधापिनो वा स्मरणस्य संज्ञानत्वादनंतरमेवेति प्राप्ते ब्रूमः। सकलस्य मंत्रस्य विनि
युक्तत्वात् सकलेन संपादितं स्मरणं कर्मांगं। अतः सकलमंत्रसमाप्तेन ज्ञानेन स्मरणं यावद्देवं न प्रभ्रष्टं तावदेव प्रयोगः
कर्तव्यः। तेन मंत्रांतस्य कर्मादेः सन्निपातः ॥ १० ॥ संततवचनाद्धारायामादिसंयोगः ॥ संततोवसोर्द्धारां जुहोतीत्यत्र संत
तवचनात्तस्य च साहित्यसर्वविदात्साहित्यस्य चानेकरूपत्वात्कर्मणश्चैकत्वात्कर्ममंत्रयोः साहित्यमिदमुच्यते। अतो
मंत्रादेः कर्मादेश्च सन्निपातः। स्यादेवं यद्येकं कर्म स्यात्। भिन्नानि हि त्र्यहाहरैर्नानि जुहोतीति संख्यया कर्माणि तेषामविच्छे शब्दादस्य
दः संततशब्देनोच्यते। जुहोतीति तेषामुपात्तत्वान्न मंत्रकर्मणोः साहित्यं मंत्रस्यानुपात्तत्वात्। अविच्छेदेपि संततशब्दो
वर्तते न केवलं साहित्ये। अतो नापि पूर्वेण वन्यायः ॥ ११ ॥ आघारे च दीर्घत्वात् ॥ आघारं प्रकृत्य श्रूयते संततमाघारयतीति।

© Dharmartha Trust J&K. Digitized by eGangotri

तत्रकर्मैकत्वान्नसंनानासंभवेमंत्रसाहित्यमेवविधीयत इत्यादिसंयोगः। तेसाहनकर्मणः क्षत्रियस्यदीर्घेणमंत्रेणोच्चु
१९ र्ध्वोर्ध्वरहस्वादिनासाहित्यसंभवः। अतोदीर्घधारस्याधार्यमाणद्रव्यस्यसांतत्यसमुच्चयेन। अतोत्रापिमंत्राणांकर्माधारे
18 वसंनिपातः॥१२॥ मंत्राणांसंनिपातित्वादेकार्थानांविकल्पःस्यात्। करणमंत्राणामेकार्थानांभगोवांविभजतित्यादीनां
व्रीहियवन्यायेनविकल्पइतिप्राप्तिस्त्रमेणद्रपवादार्थं॥१३॥ संख्याविहितेषुसमुच्चयोऽसंनिपातित्वात्। येतुसं
ख्यायुक्तामंत्राश्चतुर्भिरभ्रिमादत्त इत्येवमाद्यस्तेषामपिपूर्ववद्विकल्पः। संख्यावसात्तुसमुच्चयः। चतुःसंख्याहिकर्मांग
त्वंनान्यासतिसमुच्चयेसंपद्यते। तत्रपूर्वप्रयुक्तानांमंत्राणांसंस्कारद्वारेणकरणत्वंचरमस्यसाक्षादितिसंख्यावचनसा
मर्थ्यादध्यवसीयतेतस्मात्समुच्चयः॥१४॥ ब्राह्मणविहितेषुचसंख्यावत्सर्वेषामुपदिष्टत्वात्। येब्राह्मणविहितामंत्राउ
रुप्रथस्वेतिशुरोडाशंप्रथयतियत्पतिमिवनत्प्रजयापशुभिश्चप्रथयतीतिउरूतेयजपतिःप्रथतामितिपुरोडाशंप्र
थयतीपि। तेषामपिसर्वेषामुपदिष्टत्वादेकालेचयाक्षिकत्वाध्वसंगात्समुच्चयेपिसंख्याविहितवत्सर्वेषांकरणत्वापत्त १९

© Dharmartha Trust J&K. Digitized by eGangotri

नेः समुच्चय इति चूचन विनियोगांगीकारेण भाष्यकारेणापूर्वं प्रहितं। वार्तिककारस्तु लिंगेनैव मंत्राणां विनियोगसिद्धेः समुच्च
यार्थमेवव चनं मन्यते। तस्मादपि समुच्चय इति। मैवं लिंगे नैषां निरपेक्षसाधनत्वावगमादेतोन समुच्चयः। संख्यावशेन
हि पूर्वत्र समुच्चया श्रयणं। नचैवमिहास्ति। ब्राह्मणविनियोगस्तु येषां लिंगविनियोगो नास्ति तेषां मंत्रस्वरूपविनियोगार्थः।
येषां त्वस्ति लिंगं न तत्कार्यबाहुल्यं पर्यमितिन नैनापि समुच्चयः॥१५॥ होत्रास्तु विकल्पेरन्नेककार्यत्वात्॥ उक्थ्ये यस्य वनस्पत इत्याद
योपक्रियमाणानुवादिनो होत्रामंत्रास्तेषामप्येककरणावरेककार्यत्वाद्विकल्पप्राप्तावुच्यते। करणा हि कर्मानुष्ठाने करणभूतं
स्मृतिं पूर्वस्मरणवर्तिनीं कुर्वंति। न चैकेन तत्सिद्धावितरेण कार्यमस्तीति युक्तस्तत्र विकल्पः। क्रियमाणानुवादिनस्त्वध्वर्यु
णा क्रियमाणस्य कर्मणः स्मृत्यविच्छेदार्थाः। अविच्छेदश्चानादरपेक्षित इति सर्वेषां समुच्चयः॥१६॥ ॥इति श्रीशास्त्रदी
पिकायां द्वादशस्य तृतीयः पादः॥ ॥ जपाश्चाकर्मसंयुक्ताः स्तुसाशीरभिधानाश्रया तमानेषु समुच्चयः स्याद्राशीः पृथ
क्त्वात्॥ यत्र संनमप्पर्य प्रसपमे विवक्षिता चारणमात्र मदृष्टाय क्रियते नैवेध्सवीमनूच्य वाग्यं तव्येत्याहोसजयः। गुण

© Dharmartha Trust J&K. Digitized by eGangotri

कीर्त्तनं स्तुतिः। अग्निर्मूर्धेति। आशासनमाशीः आयुर्मे देहीति। गुणविशिष्टगुणिप्रकाशनमदृष्टार्थमभिधानं। ते
१९ ष्वा सुब्राह्मणविहितवद्विकल्पप्राप्तावदृष्टार्थता समुच्चयः॥ १॥ याज्यानुवाक्यासु नु विकल्पः स्यादेकनोयलक्षणार्थत्वात्।
तं ह्यावाहस्य स्वे कर्मणि द्वे याज्यानुवाक्यायुगले समाम्नाते इदं वामास्ये हविः अयं वाम् परिषिच्यते इत्येकं युगलं। अग्ना
बृहस्पती इमं ह्यावां हव्यस्येतिर्नः परिपातिरिं॥ तत्र समुच्चयविकल्पसंशये यथा याज्यापुरोनुवाक्ययोः स्यस्यपिदेवतोपलक्षणार्थत्वे स्वप
19 नैकार्थत्वमियः समुच्चयस्तथा युगलयोरपि स्यादविशेषादिति प्राप्तउच्यते विकल्प एकार्थत्वादिति। याज्यापुरोनु
वाक्ययोस्तु पुरोनुवाक्यापोस्तु पुरोनुवाक्यासमाख्यावशान्याप पा त विकल्प वाधेन समुच्चय इति विशेषः॥ २॥ क्रयणेषु
तु विकल्पः स्यादेकार्थत्वात्। एकहायन्या क्रीणाति वाससा क्रीणातीति इत्य क्रयद्रव्याणि तेषां विकल्पः समुच्चयो वेति विंश
ते। तत्र व्रीहियववन्यायेनैकार्थत्वाद्धि विकल्पः कथं पुनरेकार्थत्वं भिन्ना एव हि प्रतिवाक्यं क्रयाः। न ह्येकेन वाक्येन विहितं क्र
यमन्यद्वाक्यान्तरेई न्यां तरविधानं संभवति। उत्पत्तिविशिष्टद्रव्यविरोधात्। तस्मात् सर्वाणि क्रयविधानानि विधिभेदा १९

© Dharmartha Trust J&K. Digitized by eGangotri

त्वक्रयभेदः।तस्मान्नानाक्रयसाधनत्वाद्द्रव्याणांनास्त्येकार्थ्यं।अतःसंसाध्यान्नास्तिक्रयद्वारेणवस्त्वेव।सर्वैर्हिक्रयःसो
मभागस्यार्थत्वादेकार्थ्यास्तद्द्वारेणद्रव्याण्यप्येकार्थानि।तदनेनप्रकारेणक्रयाणामेवात्रविकल्पसमुच्चयौविंसने।व्रीहि
यववत्त्वविकल्पयथाप्राप्तावुच्यते।विक्रेतुरानतिरत्वप्रयोजनं।नत्वबहुभिःसुकरं।अतःकार्यप्रधानत्वात्पदार्थानांसो
कर्यमात्रोऽयसमुच्चयाश्रयणंन्याय्यं।व्रीहियवादीनांनैवं।किंचिन्नकारणमस्तियेनद्रव्यकृतानानामपिसापेक्षत्वंकल्प्य
ते।अत्रतुकार्यविशेषान्सापेक्षत्वकल्पनमितिवैषम्यं॥संस्कारेचतत्प्रधानत्वात्॥अग्नीषोमीयपशोर्गुदेनोपयजती
तिश्रुतं।पशुगणेऽनेकगुदसन्निपातेगुदानांविकल्पःसमुच्चयोवेतिचिंता।यद्यर्थकर्मत्वात्तोविकल्पः।अथप्रतिप
त्तिस्तनःसमुच्चयः।तत्रसप्तपितीयासंयोगेप्रयाजशेषवदुपसंतोपनसंपृक्तमित्येवंसिद्धस्यप्रतिपत्तित्वस्यप्रयो
जनकथनमेतत्॥४॥संख्यासुतुविकल्पःस्याच्छ्रुतिविप्रतिषेधात्।अग्न्याधेयांगानामेकादशयाषड्डयाद्वादशीनांदक्षि
णानामानर्थक्यात्क्रयवत्समुच्चयः।संख्याश्रुतिविरोधात्तुविकल्पः।समुच्चयेसंख्यानरोपजननात्संख्याहानि

© Dharmartha Trust J&K. Digitized by eGangotri

प्रसंगात्॥५॥द्रव्यविकारानुपदर्वनिर्दि[illegible]र्मस्यानयाविकल्पेनियमः प्रधानत्वात्। दर्शपूर्णमासयोः पत्नीसंया-
२० जेष्वाज्येनसहविकल्प्यमानाजाघनीविहितानाघन्यापत्नीः संयाजयंतीति। साचोदकेनाग्नीषोमीयपशौप्राप्ता अत्रापि
20 पुनः श्रूयतेजाघन्यापत्नीसंयाजयंतीति ततो[illegible]पशुगणेचोदकेनप्राप्नोति। अत्रबह्वीनांजाघनीनांसमुच्चयोविकल्पो
वेतिसंशयः। यदिप्राप्तिपक्षेनितनः समुच्चयः अथार्थकर्मनतोविकल्पः। तत्रयद्यपिदर्शपूर्णमासयोर्जाघनीगुणभूता
पत्नीसंयाजानांतथाप्यग्नीषोमीयेऽप्रदृष्टार्थत्वात्पशुनियन्त्रयाजाघन्याः प्रतिपत्त्यपेक्षायांप्रतिपत्तित्वेनपत्नी
संयाजविधानं। एवमर्थं पुनर्वचनंनतददृष्टार्थं। सपशुगतोसमुच्चयः। मैवं। आज्येनसहविकल्प्यमानायाश्चोद
कप्राप्तायाः पुनर्वचनंनियमार्थं। यथाप्राप्ताया[illegible]नियमः। प्राप्तिश्चगुणभावेनेतिनाहत्यैवनियम्यते। अतः पशुग
णेविकल्पः॥६॥उखायांकाम्यनिरूपयोः समुच्चयानियोगेकामदर्शनात्। अग्नावुख्यंपक्वस्यभूयतेब्रह्मवर्चसकामस्यानोव
सवर्चसकामस्याहृत्सावरुध्यात्। माष्टार्दनाद्यकामस्येति। तत्रकिंनित्यस्योख्यस्यकाम्यस्यचवासांगादेःसमुच्चयो २०

पवानित्योनिवर्त्यदर्शनित्यस्यहेऽवधानमात्रं कामायश्रूयतेनहोमः। तस्मात्फलायकाम्यमवधायहोमायपुनर्नित्यो
ग्निरुक्त्योवधानव्यइतिसमुच्चयः। स्यादेतदेवंयद्यवधानं विधीयते। प्राप्तएवतुहोमार्थमग्न्यवधानमाश्रित्यागमं नर
मात्रं विधीयते। प्राप्तमेवतुहोमार्थमग्न्यवधानमाश्रित्याग्मं नरमात्रं विधीयते। तस्मात्तेनकाम्येननित्यस्यनिवृत्तिः। वि
कल्पसमुच्चयविचारेसमासे समुच्चयएवास्तिनास्तीतिचिंत्यनइतिः॥ ७॥ सत्याहवनीयः स्यादाहुतिसंयोगात्। सो
पंकाम्योग्निराहवनीयशब्दवाच्यः स्यादाहूयतेस्मिन्निति। तस्मादाहवनीयधर्मोगत श्रीधारणादयोत्रकर्तव्याः। मैवं।
आधानजन्मनः संस्कारविशेषस्यवाचको यमाहवनीयशब्दो नासतितस्मिन्संस्कारेवर्तितुमर्हति। तस्मान्नात्राहवनी
यधर्माः॥ ८॥ तस्मिन्संस्कारकर्मणिरिक्षगतात्। एवंनहिसंस्कारास्तत्राधानाद्याः कर्तव्याः होमार्थत्वात्संस्काराणाम
स्यचाग्नेर्होमसाधनत्वात्। सत्यं होमसाधनीयमग्निस्तथाप्यसंस्कृतएवायंसंस्कृतस्यानापन्नइतिनात्रसंस्काराः
कर्तव्याः। नहिन्नस्याहाहृतस्यारणीमथनादिजन्यः संस्कारः शक्यतआधातुं। तस्मान्नात्रसंस्कारः॥ ९॥ नित्यधारणाविक

© Dharmartha Trust J&K. Digitized by eGangotri

सोऽनन्यैकस्मान्नप्रतिषेधः स्यात्। कृष्णाग्निप्रसंगं समाप्य पुसंगं समाप्य पुनर्निसमेवाख्याग्निमुपक्रम्य चिंतयति किमु
२१ ख्यस्य नित्यं धारणं नवेति विकल्पाउताधारणमेवेति नित्ये न प्रतिसंदिग्धादिति धारणप्रतिषेधोऽसंसामान्येनुपपद्यमा
नः प्रापकं विधिमनुमापयति। तेन चानुमितेन विधिना प्रापितं प्रतिषेधेन च प्रतिषिद्धं धारणं विकल्पमर्हतीति प्राप्ते
अभिधीयते। सामान्येनाहवनीयधारणांगत्वश्रियो विहितं मुख्य स्थापमाहवनीयस्यानापन्नः। आहवनीय एव हि संनाप
नोख्यः संज्ञानः। तस्य धारणं सामान्यवचनप्राप्तं। गत्वश्रियो धारणमुख्यविषयेऽनेन प्रतिषिध्यत इति नानेनाऽनु
न विध्यनुमानं भवति। तस्माद्धार्य एवायमुख्यः॥१०॥ परार्थान्येकोयजमानगणे॥ सत्राहीनयोरनेकयजमानस
मवाये। यजमानसंस्कारार्थो निशुक्तान्वारंभणादुंबरीसंमानादीनि नान्येकेनैव कर्तव्यानि न सर्वैः प्रयोजनाभावादि
ति प्राप्ते सूत्रमेवन्॥११॥ अनियमो विशेषात्। स चोक्तोयः कश्चित्स्यात्। अनोयेनकेनचिदेकेन कृतमन्वारंभणादि
कमितरे प्रसंगादुपजीवंतीतीदमपि प्राप्ते सूत्रमेव। सत्रेष्वपवादं वक्तुं॥१२॥ मुख्यो वा विप्रतिषेधात्॥ सत्रेषु गृहपतिरे २१

© Dharmartha Trust J&K. Digitized by eGangotri

वपरार्थानि कुर्यात्। नानियमः। कस्मादितरेषामार्त्विज्याविरोधात्॥ १३॥ सत्रे गृहपतिरसंयोगाद्धौत्रवत्। यानि पुन
र्यजमानसंस्कारार्थानि कर्माण्येयंजनाभ्यंजनादीनि तान्यपि सत्रे गृहपतिरेव कुर्यात् न सर्वे इति संशये गृहपतिः
समाख्यानात्। अत्र हि गृहशब्देन कर्मोच्यते तेन तस्य पतिर्गृहपतिः। सर्वेषां च यजमानानां स्वामित्वाद्गृहपतिशब्दार्हत्वे
सति विशेषेण कस्यचिदेषा समाख्या फलभूयस्त्वनिमित्ता। फलभूयस्त्वं च संस्काराधिक्यात्। अनन्तस्यैव संस्कारा नेत
रेषां। अत्राभिधीयते। फलिसंस्काराः सर्वेषामेव कर्तव्याः। नह्यभावे फलमेव न स्यात्। गृहपतिसमाख्या त्वार्त्विज्याभावात्।
इतरे त्वार्त्विज्यं कुर्वाणाः कर्मकरा इव भवंति। अयं तु केवलयाजमानकरणात्स्वामिवाविनागृहपतिशब्देनोच्यते। भवति फल
भूयस्त्वं नत्वनुवचनात्। स हि भूयिष्ठाम् ऋद्धिमृध्नोतीति न संस्काराधिक्यात्। अतः सर्वे याजमानं कुर्युः॥ यत्रार्त्विज्ययाजमान प्रतिषेधपरं
योर्विप्रतिषेधः तत्रार्त्विज्यमेव कुर्युः। प्रधानत्वात्। कर्तारो हि कर्मणां गुणभूताः। कर्तॄणामपि गुणभूताः संस्काराः प्रसङ्गवि
धानाद्वा। ये यजमानास्त ऋत्विज इत्यनेन त्वार्त्विज्यं सर्वेषां स्यात्। विप्रतिषेधे परमिति सत्रे याजमानार्त्विज्ययोरार्त्वि

© Dharmartha Trust J&K. Digitized by eGangotri

ज्यं बलीय इत्युक्तं नत्वसंगार्त्विज्ये कृतार्थित्वं तेन दर्शपूर्णमासज्योतिष्टोमादिषु किं त्रिभिरपि द्विजातिभिरार्त्विज्यं
२२ कारयितव्यमुत ब्राह्मणैरेवेति संशयः। तत्र त्रयोप्यार्त्विज्यमर्हन्ति विद्वत्त्वात्समरणं पुनः। पुरुषार्थमतः कर्मवैगुण्यं ना
स्ति किंचन। याजनाध्यापनप्रतिग्रहा ब्राह्मणस्यैवेत्युपायाइति नियमः पुरुषार्थतयास्मर्यते न क्रत्वर्थतया। तेन क्षत्रि
यवैश्यावार्त्विज्यं कुर्वतो नियमातिक्रमात्कामं स्वधर्मात्प्रच्यवेयातां ननु क्रतोः काचिद्गुणहानिः। तस्मात्त्रिभिरप्यार्त्विज्यं
कारयितव्यमिति प्राप्ते ब्रूमः। द्विजोत्तमानामार्त्विज्यं न तु क्षत्रियवैश्ययोः। ब्राह्मणार्त्विज्यनियमः क्रत्वर्थेनापि हि स्मृतेः।
यद्व्याख्यास्याम इत्युपक्रम्य ब्राह्मणानामार्त्विज्यमिति स्मरन्तोपहस्तप्रकारैः क्रत्वर्थेन स्मान्नीतिस्पष्टमेव। तथा च भ
वद्रामायणेपि। क्षत्रियो याजको यस्य चाण्डालस्य विशेषतः। कथं सदसि भोक्तारो हविस्तस्य सुरर्षय इति। सुरा देवताः। अथ
यश्चर्त्विग्भूताइति निदेवताह विभाग निराकरणात्क्रतुवैगुण्यमेव दर्शितं। राजयाजकयाज्यस्य विनश्यति यथा हविरि
मन्त्रायुणार्त्विज्ये हविर्नाशश्रुतेः। लिंगानि च दर्शितानि ब्राह्मणानामित्यंह विरिसेवमादीनि। तस्माद्ब्राह्मणानामेवार्त्वि २२

© Dharmartha Trust J&K. Digitized by eGangotri

ज्यमिति निश्चितं॥ मध्ये नंत्रं यस्य येषां विधानं नेषु प्रोक्तेषु त्यनंत्र प्रसंगः। जिज्ञासोपो धर्म उक्तश्च नु धीसप्रज्ञानो लक्ष
२३ ऐन्द्रीं दशांतैः॥१७॥ ॥इत्युपाध्यायश्रीपार्थसारथिमिश्रविरचितायां शास्त्रदीपिकायां द्वादशस्याध्यायस्य चतु
र्थः॥पादोऽध्यायश्च समाप्तः॥ ॥शुभमस्तु॥ छ॥ छ॥ छ॥ छ॥ छ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

२३

मीमांसा.. शास्त्रदीपका ९३००० ३३

४३४८
२३ प
सं० ९२६८

© Dharmartha Trust J&K. Digitized by eGangotri